## ते तद्राजाः । (१७४/११९२)

'[1]जनपदशब्दात् क्षत्रियाद् अञ्' (४.१.१६८/११८६) इत्येवमादयः[2] प्रत्ययाः सर्वनाम्ना प्रत्यवमृश्यन्ते, न तु [3]पूर्वे, [4]गोत्रयुवसञ्ज्ञाकाण्डेन व्यवहितत्वात् । [5]तेऽञादयः तद्राजसञ्ज्ञा भवन्ति । तथा [6]चोदाहृतम् । तद्राजप्रदेशाः – 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' (२.४.६२/११९३) इत्येवमादयः ॥

## कम्बोजाल्लुक् । (१७५/११९४)

जनपदशब्दात् क्षत्रियात् (४.१.१६८/११८६) इत्यनेन विहितस्य अञो लुगुच्यते । कम्बोजात्[7] प्रत्ययस्य लुक् भवति । [8]कम्बोजः ।

[३९६] कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम् । (म. भा. २. २७०)

चोलः । केरलः । शकः । [9]यवनः । तस्य राजनि इत्येव, कम्बोजो राजा ॥

## स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । (१७६/११९५)

[10]अवन्तिकुन्तिकुरुशब्देभ्य उत्पन्नस्य तद्राजस्य[11] स्त्रिया[12]मभिधेयायां लुग् भवति । अवन्तिकुन्तिभ्यां ञ्यङः, कुरोर्ण्यस्य । अवन्ती । कुन्ती । कुरूः । स्त्रियाम् इति किम्? आवन्त्यः । कौन्त्यः । कौरव्यः ॥

## अतश्च । (१७७/११९६)

स्त्रियाम् इत्येव । अकारप्रत्ययस्य तद्राजस्य स्त्रिया[13]मभिधेयायां लुग्भवति । तकारो विस्पष्टार्थः । शूरसेनी । मद्री । दरत् । अवन्त्यादिभ्यो लुग्वचनात् तदन्तविधिरत्र नास्ति, तेनेह न भवति, आम्बष्ठ्या । सौवीर्या ॥

## न प्राच्यभर्गादियौधेयादिभ्यः । (१७८/११९७)

प्राच्येभ्यः भर्गादिभ्यः यौधेयादिभ्यश्च उत्पन्नस्य[14] लुग्न भवति । 'अतश्च' (४.१.१७७/११९६) इत्यनेन स्त्रियां लुक् प्राप्तः प्रतिषिध्यते । प्राच्येभ्यः क्षत्रियेभ्यस्तावत् – पाञ्चाली । वैदेही । आङ्गी । वाङ्गी । मागधी । भर्गादिभ्यः – भार्गी । कारूषी । कैकेयी । यौधेयादिभ्यः – यौधेयी । शौभ्रेयी । शौक्रेयी ।

कस्य पुनरकारस्य प्रत्ययस्य यौधेयादिभ्यो लुक् प्राप्तः प्रतिषिध्यते ? [15]पाञ्चमिकस्याञः, पर्श्वादियौधेयादिभ्याम् अणञौ (५.३.११७/२०७०) इत्येतस्य । कथं पुनस्तस्य भिन्नप्रकरणस्थस्यानेन लुक् प्राप्नोति ? एतदेव विज्ञापयति पाञ्चमिकस्यापि तद्राजस्य अतश्च इत्यनेन लुग् भवति इति । किमेतस्य ज्ञापनेन प्रयोजनम् ? पर्श्वाद्यणः स्त्रियां लुक् सिद्धो भवति । पर्शूः । रक्षाः । असुरी । तथा चोक्तं यौधेयादिप्रतिषेधो [16]ज्ञापकः पर्श्वाद्यणो लुक् इति ।

---

1. ते इत्यधिकम् फ. 2. अञादयः क. ड. 3. परे क. 4. युवसञ्ज्ञाकाण्डेन क. 5. ते नास्ति फ. 6. चैव क. फ. ब. 7. परस्य इत्यधिकम् फ. 8. कम्बोजः नास्ति ब. 9. यवनः नास्ति फ. 10. अवन्ति कुन्ति कुरु इत्येतेभ्यः फ. 11. प्रत्ययस्य इत्यधिकम् फ. 12. अभिधेयायां नास्ति फ. 13. अभिधेयायां नास्ति फ. 14. प्रत्ययस्य इत्यधिकम् ब. 15. तद्राजस्य अञः ब. 16. ज्ञापकम् ब.